श्री भास्कर सप्तकं (सप्तसप्तिसप्तकं)

श्री भास्कर सप्तकं (सप्तसप्तिसप्तकं)

ध्वांतदंतिकेसरी हिरण्यकांतिभासुरः
कोटिरश्मिभूषितस्तमोहरोऽमितद्युतिः |
वासरेश्वरो दिवाकरः प्रभाकरः खगो
भास्करः सदैव पातु मां विभावसू रविः || 1 ||

यक्षसिद्धकिन्नरादिदेवयोनिसेवितं
तापसैर्ऋषीश्वरैश्च नित्यमेव वंदितं |
तप्तकांचनाभमर्कमादिदैवतं रविं
विश्वचक्षुषं नमामि सादरं महाद्युतिं || 2 ||

भानुना वसुंधरा पुरैव निर्मिता तथा
भास्करेण तेजसा सदैव पालिता मही |
भूर्विलीनतां प्रयाति काश्यपेयवर्चसा
तं रवि भजाम्यहं सदैव भक्तिचेतसा || 3 ||

अंशुमालिने तथा च सप्तसप्तये नमो
बुद्धिदायकाय शक्तिदायकाय ते नमः |
अक्षराय दिव्यचक्षुषेऽमृताय ते नमः
शंखचक्रभूषणाय विष्णुरूपिणे नमः || 4 ||

भानवीयभानुभिर्नभस्तलं प्रकाशते
भास्करस्य तेजसा निसर्ग एष वर्धते |
भास्करस्य भा सदैव मोदमातनोत्यसौ
भास्करस्य दिव्यदीप्तये सदा नमो नमः || 5 ||

अंधकारनाशकोऽसि रोगनाशकस्तथा
भो ममापि नाशयाशु देहचित्तदोषतां |
पापदुःखदैन्यहारिणं नमामि भास्करं
शक्तिधैर्यबुद्धिमोददायकाय ते नमः || 6 ||

भास्करं दयार्णवं मरीचिमंतमीश्वरं
लोकरक्षणाय नित्यमुद्यतं तमोहरं |
चक्रवाकयुग्मयोगकारिणं जगत्पतिं
पद्मिनीमुखारविंदकांतिवर्धनं भजे || 7 ||

सप्तसप्तिसप्तकं सदैव यः पठेन्नरो
भक्तियुक्तचेतसा हृदि स्मरन् दिवाकरं |
अज्ञतातमो विनाश्य तस्य वासरेश्वरो
नीरुजं तथा च तं करोत्यसौ रविः सदा || 8 ||

इति श्री आपटीकरविरचितं सप्तसप्तिसप्तकं नाम श्री भास्कर सप्तकं |